# Kailasashaile Ashtadikpratishthitan Nishadhahemakutadikrita Shiva Stuti

# કૈલાસશૈલે અષ્ટદિક્પ્રતિષ્ઠિતાન્ નિષધહેમકૂટાદિકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Kailasashaile Ashtadikpratishthitan Nishadhahemakutadikrita Shiva Stuti

File name : shivastutiHniShadhahemakUTAdikRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 28-29-30| vAvRittashlokAH ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# કૈલાસશૈલે અષ્ટદિક્પ્રતિષ્ઠિતાન્ નિષધહેમકૂટાદિકૃતા શિવસ્તુતિઃ

સ્કન્દઃ -

તત્ર શૈલાશ્શિવેનૈવ ચાષ્ટદિક્ષુ પ્રતિષ્ઠિતાઃ ।
નિષધો હેમકૂટશ્ચ વિન્ધ્યો મલયદર્દુરૌ ॥ ૨૮.૪॥

મન્દરો હિમવાંશ્ચૈવ નીલોઽત્રૈવ પ્રકાશિતઃ ।
તેષાં તપસ્યયા શમ્ભુસ્સન્તુષ્ટો નિતરાં તદા ॥ ૨૮.૫॥

સ્વાવાસેઽપિ મહાશૈલે મહાકૈલાસપર્વતે ।
તેષાં નિત્યં નિવસતિં દદૌ કારુણ્યતશ્શિવઃ ॥ ૨૮.૬॥

પૂર્વતો નિષધો ભાતિ ચાગ્નેય્યાં હેમકૂટકઃ ।
વિન્ધ્યોઽસૌ દક્ષિણે ભાતિ મલયો નૈરૃતે સ્થિતઃ ॥ ૨૮.૮॥

વારુણ્યાં દર્દુરો ભાતિ વાયવ્યાં ભાતિ મન્દરઃ ।
હિમવાનુત્તરે ભાતિ ચૈશાન્યાં નીલપર્વતઃ ॥ ૨૮.૯॥

અષ્ટદિક્ષુ સ્થિતા એતે મહાકૈલાસપર્વતે ।
સ્વમૌલિભિર્ભાસયન્તિ દિશાં સ્તોમં નગોત્તમાઃ ॥ ૨૮.૧૦॥

શૃણુષ્વ જૈગીષવ્યત્વં પાપભઙ્ગાય કેવલમ્ ।
નિષધેશો હેમકેશો વિન્ધ્યેશો મલયેશ્વરઃ ॥ ૩૦.૬૩॥

દર્દુરેશો મન્દરેશો હિમશૈલેશ્વરો હરઃ ।
નીલેશ્વરોઽહિ પરિતો મહાસૌધવરાશ્રયાઃ ॥ ૩૦.૬૪॥

રમ્યગોપુરકોપેતા નગાસ્તત્ર વપુર્ધરાઃ ।
પૂજયન્ત્યત્ર લિઙ્ગાનિ બિલ્વપત્રૈર્મનોહરૈઃ ॥ ૩૦.૬૫॥

- -

નિષધઃ -

નિષધેશં ભવરોગભેષજં સુનિષણ્ણં સકલેઽપિ ભૂતવર્ગે ।
વિષમાક્ષં કલુષૈર્વિહીનદેહં પ્રણમામીશ્વરમેવમેવ નિત્યમ્ ॥ ૨૮.૩૧॥

હેમકૂટઃ -
પાપાદ્રિકૂટકુલિશોત્તમ હેમકૂટ વીટીકૃતાખિલ સુમેરુજ હેમકૂટ ।
પ્રોદ્યત્સુધાંશુચયમૌલિતટોરુભાસ્વત્કોટીર ઘોટકકૃતાગમકૂટ પાહિ ॥ ૨૮.૪૯॥

વિન્ધ્યઃ -
વિન્ધ્યેશ વન્ધ્યદિવસો ન ભવેત્કદાચિત્વત્પાદપુજનનતિસ્તુતિભિર્મમાદ્ય ।
વન્ધ્યોઽપિ ત્વત્પદનિવેદિતભોજ્યભુક્સ્યાદ્વિન્ધ્યોપમં દૃઢતરં હિ સુતં લભેત ॥ ૨૯.૨૦॥

મલયઃ -
મલયેશ મહેશ શઙ્કર પ્રમથાધીશ્વર ચારુચન્દ્રમૌલે ।
ત્વયિ જાતમિદં જગત્કિલાપિ શમ્ભો પ્રલયં યાતિ લયે ત્વદીયકુક્ષૌ ॥ ૨૯.૩૪॥

દર્દુરઃ -
પાપાપારમતઙ્ગકુમ્ભહરણે ત્વં શઙ્કરો દર્દુરો
ભીમોઽહીશ્વરકઙ્કણોત્તમલસત્પાણીનખોદ્યત્પ્રભઃ ।
સિહ્મસ્સર્વસુરેશ્વરો હિ ભગવાનિન્દૂકપર્દોજ્વલઃ
સર્વેષાં જનિતા ગરાઞ્ચિતગલઃ કાશે ગુણૈર્વાચકઃ ॥ ૨૯.૫૦॥

(સર્વેષાં જનિતા ગરઞ્જરયિતા કેશં ગુણૈર્વાચકઃ) ॥ ૨૯.૫૦॥

(સર્વેષાં જનિતા ગહરઞ્જરયિતા કેશો ગુણૈર્વાચકઃ) ॥ ૨૯.૫૦॥

મન્દરઃ -
શ્રીમન્દરેશ વિવિધાગમમૌલિવૃન્દસન્દોહનન્દિતપદામ્બુજભૃઙ્ગભાવમ્ ।
સમ્પ્રાર્થયામિ તરુણેન્દુકલાલલામ વૃન્દારવન્દિતપદામ્બુજસેવયાહમ્ ॥ ૩૦.૧૮॥

હિમવાન્ -
પરિણતહિમધામકાન્તિરાજજ્જટયાલઙ્કૃતગઙ્ગયોરુભાસમ્ ।
ભવદાનનપઙ્કજોત્પલાભૈ રવિસોમાનલલોચનૈર્વિલોકયાશુ(+માન્તવમ્) ॥ ૩૦.૪૬॥

નીલઃ -
નીલલોહિત મહાગરકન્ધરામલકપાલભુજઙ્ગવિભૂષણ ।
કાલકાલભગવન્કૃપામ્બુધે તારયાશુ ભવસંસૃતિજાલમ્ ॥ ૩૦.૬૭॥

ગિરયઃ -
હર હર પરમેશ દેવદેવ ત્રિપુરયમાન્ધકજાતભીતિનાશ ।

અગપતિતનયાધવ પ્રભો નઃ પરિપાહીશ્વર દેવસાર્વભૌમ ॥ ૩૦.૬૯॥

ભવતા ભવતાપહારિણા વસતા નાકશિરોત્થસૌધમૌલૌ ।
વયમપ્યમલા નગાશ્શિલાભિર્નગવલ્લીતૃણપક્ષિવીરુધૈઃ ॥ ૩૦.૭૦॥

સુમૃગૈરપિ ચન્દ્રચૂડ શમ્ભો ગતિભાજસ્સુતરાં ચ ધન્યધન્યાઃ ।
વેદેષુ પ્રથિતોઽસિ રુદ્ર ભગવન્ મીઢુષ્ટમશઙ્કુરો
બભ્રુશ્શમ્ભુરખણ્ડઘોષકરણશ્ચોગ્રોઽસિ ભીમોઽસિ ચ ।
અસ્માકન્ત્વધિપોઽસિ પાહિ દયયા ખ્યાતો નિરીશોઽપિ ચ ॥ ૩૦.૭૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે અષ્ટદિક્પ્રતિષ્ઠિતાન્ નિષધહેમકૂટાદિકૃતા શિવસ્તુતિઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૮-૨૯-૩૦। વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 28-29-30. vAvRRittashlokAH ..

Notes:
Skanda સ્કન્દ outlines to Jaigīṣavya જૈગીષવ્ય; the eulogies to Śiva શિવ, recited by the eight mountains stationed in the eight directions - Aṣṭadiśāḥ અષ્ટદિશાઃ around Mount Kailāsa કૈલાસ શૈલ (viz. in Niṣadha નિષધ in the East, Hemakūṭaka હેમકૂટક in SouthEast, Vindhya વિન્ધ્ય in the South, Malaya મલય in SouthWest, Dardura દર્દુર in the West, Mandara મન્દર in NorthWest, Himavān હિમવાન્ in the North and Nīla નીલ in NorthEast), as they worship the respective Śivaliṅga-s શિવલિઙ્ગ (viz. Niṣadheśvaram નિષધેશ્વરમ્, Hemakūṭeśvaram હેમકૂટેશ્વરમ્, Vindhyeśvaram વિન્ધ્યેશ્વરમ્, Malayeśvaram મલયેશ્વરમ્, Dardureśam દર્દુરેશમ્, Mandareśam મન્દરેશમ્, Himācaleśvaram હિમાચલેશ્વરમ્, Nīleśam નીલેશમ્ ) at their residences - central to which is the Residence of the ever compassionate Śiva શિવ, who also sports with the Devī દેવી in all the eight directions.

Encoded and proofread by Ruma Dewan

*Kailasashaile Ashtadikpratishthitan Nishadhahemakutadikrita Shiva Stuti*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*